[1]तूर्णम् - [A]तूर्णः-तूर्णवान्, तूर्वितः, तुतूर्विषितः, तोतूर्वितः-तवान्;
तूर्वः, तूर्वः, तुतूर्विषुः, तोतूर्वः;
तूर्वितव्यम्, तूर्वयितव्यम्, तुतूर्विषितव्यम्, तोतूर्वितव्यम्;
तूर्वणीयम्, तूर्वणीयम्, तुतूर्विषणीयम्, तोतूर्वणीयम्;
[2]तूर्व्यम्, तूर्व्यम्, तुतूर्विष्यम्, तोतूर्व्यम्; —
ईषत्तूर्वः-दुस्तूर्वः-सुतूर्वः; — — —
तूर्व्यमाणः, तूर्व्यमाणः, तुतूर्विष्यमाणः, तोतूर्व्यमाणः;
तूर्वः, तूर्वः, तुतूर्विषः, तोतूर्वः;
तूर्वितुम्, तूर्वयितुम्, तुतूर्विषितुम्, तोतूर्वितुम्;
[3]तूर्वा, तूर्वणा, तुतूर्विषा, तोतूर्वा;
तूर्वणम्, तूर्वणम्, तुतूर्विषणम्, तोतूर्वणम्;
तूर्वित्वा, तूर्वयित्वा, तुतूर्विषित्वा, तोतूर्वित्वा;
प्रतूर्व्य, प्रतूर्व्य, प्रतुतूर्विष्य, प्रतोतूर्व्य;
तूर्वम् २, तूर्वित्वा २, } तूर्वम् २, तूर्वयित्वा २, } तुतूर्विषम् २, तुतूर्विषित्वा २, } तोतूर्वम् २; तोतूर्वित्वा २. }

## (757) "तुल उन्माने" (X-चुरादिः-1599. सक. सेट्. उभ.)

तोलकः-लिका, तुतोलयिषकः-षिका; तोलयिता-त्री, तुतोलयिषिता-त्री; तोलयन्-न्ती, तुतोलयिषन्-न्ती; तोलयिष्यन्-न्ती-ती, तुतोलयिषिष्यन्-न्ती-ती; तोलयमानः, तुतोलयिषमाणः; तोलयिष्यमाणः, तुतोलयिषिष्यमाणः; प्रतोलू-प्रतोली-प्रतोलः; तोलितम्-तः-तवान्, तुतोलयिषितः-तवान्; तोलः, [4]तुलः[B], तुतोलयिषुः; तोलयितव्यम्, तुतोलयिषितव्यम्;

---

1. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्णिषेधः। 'राल्लोपः' (6-4-21) इति वकारस्य लोपः। 'हलि च' (8-2-77) इति दीर्घः। 'रदाभ्यां निष्ठातो नः—' (8-2-42) इति निष्ठानत्वम्। णत्वम्।
2. 'हलो यमां यमि लोपः' (8-4-64) इत्यत्र यथासंख्यविज्ञानाच्च लोपः।
3. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः।
4. 'चुरादिणिचोऽनित्यत्वात् तदभावः।' इति धातुकाव्यव्याख्याने (3-21) प्रोक्तम्।

A. 'प्रस्यूतगोपीशुचमूर्णपूतनं तूर्णानसं थूर्णबकादिदानवम्।' धा. का. 1.73.

B. 'दुर्दान्तचक्र पशुपचुक्रनमप्यरौत्सीत्
प्रक्षालितक्षितितलातुलवर्षरोधी।' धा. का. 3.21.